# आश्रम नित्य प्रार्थन

1. शिवेति शौरीति गजाननेति
स्कंदेति देवीति रवीति वायं
अर्चंति भक्त्या भुवि भारतेस्मिन
तमेक देवं शरणं व्रजामः

2. यदाज़्या व्योम्नि रविः प्रभाति
यदाज़्या अग्निः दहति प्रकामं
यदाज़्यावाति सदा गतिश्च
तमेक देवं शरणं व्रजामः

3. जल स्वरूपं दहन स्वरूपं
पृथ्वी स्वरूपं ननु वायु रूपं
वदंति यंवा गगन स्वरूपं
तमेक देवं शरणं व्रजामः

4. अरण्य मध्ये गिरि तुंग शृंगे
नदी तटे वाथ तटाक मध्ये
गेहांतरेयोर्चित एक एव
तमेक देवं शरणं व्रजामः

5. य एव कर्ता भुवनस्य हर्ता
संरक्षको वा कथितः पुराणः
त्रिमूर्ति रूपेण विराजते यः
तमेक देवं शरणं व्रजामः

6. अल्लेति नाम्ना जिन देव नाम्ना
बुद्धेति नाम्ना च यमाह्वयंति
वदंति यं गाडिति आंग्ल लोकाः
तमेक देवं शरणं व्रजामः

7. बैबिल्लु मध्येथ खुराण मध्ये
शास्त्रेषु वेदेषु पुराण वर्गे
यत्कीर्तिरेका विरतं सुघुष्टा
तमेक देवं शरणं व्रजामः

8. इगिर्जु मस्जीद सुमंदिरेषु
प्रेयर्नमाज अर्चन पंक्तिभिर्यं
अर्चंति गायंति च यद्गुणौघान
तमेक देवं शरणं व्रजामः

9. अनंत नाम्ना परिशेभिते यः
अनंत रूपेण विराजितश्च
अनंत वीर्यादि गुणैः प्रपूर्णः
तं सच्चिदानंद विभुं व्रजामः